# मन्त्र मातृका पुष्पमाला स्तवः

कल्लो लोल्लसिता मृताब्धि लहरी मध्ये विराजन्मणि-
द्वीपे कल्पक वाटिका परिवृते कादम्ब वाट्युज्ज्वले ।
रत्नस्तम्भ सहस्र निर्मित सभा मध्ये विमानोत्तमे
चिन्तारत्न विनिर्मितं जननि ते सिह्मासनं भावये ॥ १॥

एणाङ्कानल भानु मण्डल लसच्छ्रीचक्र मध्ये स्थितां
बालार्क द्युति भासुरां करतलैः पाशाङ्कुशौ बिभ्रतीम् ।
चापं बाण मपि प्रसन्न वदनां कौसुम्भ वस्त्रान्वितां
तां त्वां चन्द्रकलावतम्स मकुटां चारुस्मितां भावये ॥ २॥

ईशनादिपदं शिवैक फलकं रत्नासनं ते शुभं
पाद्यं कुङ्कुम चन्दनादि भरितैर् अर्घ्यं सरत्नाक्षतैः ।
शुद्धै राचमनीयकं तव जलैः भक्त्या मया कल्पितं
कारुण्यामृत वारिधे तदखिलं सन्तुष्टये कल्पताम् ॥ ३॥

लक्ष्ये योगिजनस्य रक्षितजगज्जाले विशालेक्षणे
प्रालेयाम्बु पटीर कुङ्कुम लसत् कर्पूर मिश्रोदकैः ।
गोक्षीरैरपि नारिकेल सलिलैः शुद्धोदकै र्मन्त्रितैः
स्नानं देवि धिया मयैत दखिलं सन्तुष्टये कल्पताम् ॥ ४॥

ह्रीङ्काराङ्कित मन्त्र लक्षित तनो हेमाचलात्सञ्चितैः
रत्नै रुज्ज्वल मुत्तरीय सहितं कौसुम्भ वर्णांशुकम् ।
मुक्ता सन्तति यज्ञसूत्र ममलं सौवर्ण तन्तूत्भवं

दत्तं देवि धिया मयैत दखिलं सन्तुष्टये कल्पताम् ॥ ५॥
हम्सैरप्यति लोभनीय गमने हारावली मुज्ज्वलां
हिन्दोल द्युति हीर पूरित तरे हेमाङ्गदे कङ्कणे ।
मञ्जीरौ मणिकुण्डले मकुटमप्यर्धेन्दु चूडामणिं
नासा मौक्तिक मङ्गुलीय कटकौ काञ्चीमपि स्वीकुरु ॥ ६॥

सर्वाङ्गे घनसार कुङ्कुम घन श्रीगन्ध पङ्काङ्कितं
कस्तूरी तिलकञ्च फाल फलके गोरोचना पत्रकम् ।
गण्डा दर्शन मण्डले नयनयोर् दिव्याञ्जनं तेऽञ्चितं
कण्ठाब्जे मृग नाभि पङ्क ममलं त्वत्प्रीतये कल्पताम् ॥ ७॥

कल्हारोत्पल मल्लिका मरुवकैः सौवर्ण पङ्केरुहैः
जाती चम्पक मालती वकुलकैः मन्दार कुन्दादिभिः ।
केतक्याकरवीरकै र्बहुविधैः कॢप्ताः स्रजो मालिकाः
सङ्कल्पेन समर्पयामि वरदे सन्तुष्टये गृह्यताम् ॥ ८॥

हन्तारं मदनस्य नन्दयसि यैः अङ्गै रनङ्गोज्ज्वलैः
यैर्भृङ्गावलि नील कुन्तल भरैः बध्नासि तस्या शयम् ।
तानीमानि तवाम्ब कोमलतरान्यामोद लीला गृहाणि
आमोदाय दशाङ्ग गुग्गुलु घृतैर्धूपै रहं धूपये ॥ ९॥

लक्ष्मी मुज्ज्वलयामि रत्न निवहोत्भास्वत्तरे मन्दिरे
मालारूप विलम्बि तैर्मणिमय स्तम्भेषु सम्भावितैः ।
चित्रै र्हाटक पुत्रिका करधृतैः गव्यै र्घृतै र्विर्धितैः

दिव्यै र्दीप गणैर्धिया गिरिसुते सन्तुष्टये कल्पताम् ॥ १०॥

ह्रीङ्कारेश्वरि तप्त हाटक कृतैः स्थाली सहस्रै भृतं
दिव्यान्नं घृत सूप शाक भरितं चित्रान्न भेदं तथा ।
दुग्धान्नं मधु शर्करा दधि युतं माणिक्य पात्रे स्थितं
माषापूप सहस्र मम्ब सफलं नैवेद्य मावेदये ॥ ११॥

सच्छायै र्वर केतकी दलरुचा ताम्बूल वल्लीदलैः
पूगैर्भूरि गुणैः सुगन्धि मधुरैः कर्पूर खण्डोज्ज्वलैः ।
मुक्ता चूर्ण विराजितै र्बहुविधै र्वक्त्राम्बुजामोदनैः
पूर्णा रत्न कलाचिका तव मुदे न्यस्ता पुरस्तादुमे ॥ १२॥

कन्याभिः कमनीय कान्तिभि रलंकारा मलारार्तिका
पात्रे मौक्तिक चित्र पङ्क्ति विलसद् कर्पूर दीपावलिः ।
तत्तत्ताल मृदङ्ग गीत सहितं नृत्य त्पदाम्भोरुहं
मन्त्राराधन पूर्वकं सुविहितं नीराजनं गृह्यताम् ॥ १३॥

लक्ष्मी मौंक्तिक लक्ष कल्पित सितच्छत्रं तु धत्ते रसात्
इन्द्राणी च रतिश्च चामरवरे धत्ते स्वयं भारती ।
वीणामेण विलोचनाः सुमनसां नृत्यन्ति तद्रागवत्
भावै राङ्गिक सात्त्विकैः स्फुटरसं मातस्त दाकर्ण्यताम् ॥ १४॥

ह्रीङ्कारत्रय सम्पुटेन मनुनोपास्ये त्रयी मौलिभिः
वाक्यै र्लक्ष्यतनो तव स्तुति विधौ को वा क्षमेताम्बिके ।
सल्लापाः स्तुतयः प्रदक्षिण शतं सञ्चार एवास्तु ते

संवेशो नमसः सहस्र मखिलं त्वत्प्रीतये कल्पताम् ॥ १५॥

श्रीमन्त्राक्षर मालया गिरिसुतां यः पूजयेच्चेतसा
सन्ध्यासु प्रतिवासरं सुनियतः तस्यामलं स्यान्मनः ।
चित्ताम्भोरुह मण्डपे गिरिसुता नृत्तं विधत्तेरसात्
वाणी वक्त्र सरोरुहे जलधिजा गेहे जगन्मङ्गला ॥ १६॥

इति गिरिवर पुत्री पाद राजीव भूषा
भुवन ममलयन्ती सूक्ति सौरभ्य सारैः ।
शिव पद मकरन्द स्यन्दिनीयं निबद्धा
मदयतु कवि भृङ्गान् मातृका पुष्पमाला ॥ १७॥

इति श्रीमच्छङ्कर भगवत्पाद विरचितः
मन्त्र मातृका पुष्पमाला स्तवः सम्पूर्णः ॥